**2026**

**UGVYDS403**

**सिद्धान्तकौमुदी - 5**

**तृतीयपत्रम्**

**पूर्णाङ्काः – 60**

**समयः – सार्धघण्टाद्वयम्**

**अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् -** **1×10=10**

1. दशलकारेषु पञ्चमो लकारः कुत्र प्रयुज्यते?
2. नाधृधातोः कस्मिन्नर्थे आत्मनेपदं भवति ?
3. सनाद्यन्तानां शब्दानां धातुसंज्ञा केन सूत्रेण विधीयते ?
4. 'रोषिता' इत्यत्र इडागमविधायकं सूत्रं किम् ?
5. 'परिसोढा' इत्यत्र षत्वं कथन्न ?
6. 'आह' इत्यत्र को धातुः ?
7. 'प्रहण्मि' इत्यत्र णत्वं केन सूत्रेण विधीयते ?
8. 'शासिवसिघसीनां च' इति सूत्रं किं करोति ?
9. 'अच्युतत्' इत्यत्र अङ्विधायकं सूत्रं किम् ?
10. क्राम्यति इत्यत्र दीर्घः केन सूत्रेण भवति ?

**अधस्तनेषु प्रश्नेषु पञ्च समाधेयाः -** **6×5=30**

11. भवामि, अभवत् एतौ साधनीयौ।
12. गोपायाञ्चकार इति साधनीयः।
13. भरिष्यति, ग्लायात् एतयोः सिद्धिः कार्या।
14. अत्ति, जहि एतयोः सिद्धिः कार्या।
15. रोदिति, अजागरुः इत्यतौ साधनीयौ ।
16. गमिष्यति, इयाज एतयोः सिद्धिः कार्या।
17. वत्स्यति, विव्यथे इत्यनयोः सिद्धिः कार्या ।

**अधोलिखितेषु प्रश्नेषु द्वौ समाधेयौ -** **10×2=20**

18. 'लः कर्मणि च भावे चाकर्मकेभ्यः' इति सूत्रं सोदाहरणं व्याख्यायत ।
19. 'पुषादिद्युताद्यलृदितः परस्मैपदेषु' इति सूत्रं सोदाहरणं व्याख्यायत ।
20. 'पाघ्राध्मास्थाम्नादाण' इति सूत्रं प्रपूर्य सोदाहरणं व्याख्यायत ।
21. अवोचत्, अधिजगे, विदाङ्करोतु एते साधनीयाः ।

****